अथ आदित्यहृदयस्तोत्र

प्रकाशक–

बाबू ठाकुरप्रसाद गुप्त बुकसेलर,

राजादरवाजा, व्यास कचौड़ीगली, बनारस सिटी। मूल्य ।=)

भूमिका

नीचे लिखित वाक्यों को पढ़कर आदित्य हृदय का पाठ करिये—

१ हमारे यहाँ अटूट अन्न रहे, एतदर्थ सूर्योपासना करे।

२ सम्पत्ति के लिए सूर्योपासना करो।

३ पुत्र कामना तथा आयु कामना के लिये पाठ करे।

४ हम महाविद्वान् तथा धीरता, सद्बुद्धि, आदि कामना के लिए पाठ करें।

५ स्त्री, पुरुष आदि एक समय या दोनों समय पाठ कर सकते हैं।

६ शत्रुओं के दमन और युद्ध में विजयार्थ पाठ करें।

७ सब तरह के पाप समूल नष्ट हों इसलिए पाठ करें।

८ चिन्ता और शोक को दूर करने के लिए पाठ करें।

९ मनुष्यमात्र के रोग (खुजली, दाद, कुष्ठ, अशुभसूचक स्वप्न, और अनेक तरह के रोग) और मन चाहे फल कामना के लिए आदित्यहृदय का पाठ या

महामहोपाध्याय पं० विद्याधरजी गौड़ के यहाँ से प्रकाशित सूर्ययागप्रयोग से सूर्ययाग करें।

१० जन्मजन्मान्तरप्राप्त दरिद्रता (सदाचाररतो विप्रो धनार्जनपराङ्मुखः। कुटुम्बव्ययतमर्थिकः सदरिद्र इति स्मृतः॥ यस्य स्यादशनाभावः सदाचाररतस्य हि। महादरिद्रः स भवेद्दासोधान्यविवर्जितः॥ संस्काररत्नमाला) दूर करने के लिए पाठ करे।

११ विवाहार्थ तथा सन्तानोत्पत्ति के लिए पाठ कर सकते हैं।

१२ हमारा यश सूर्य के तेजकी तरह चमके एतदर्थ कामना वाले भी पाठ करें।

१३ जिसकी सन्तान जीवित न रहती हो वह या उसकी स्त्री आदि भी पाठ कर सकती हैं।

१४ पति वशीभूत या स्त्री वशीभूत या सपरिवार मेरे कहने में चले इत्यादि कामना वाले भी पाठ कर सकते हैं।

१५ हम या हमारा परिवार सुखी रहेगा इस जानकारी के लिए सूर्योपासना करे।

१६ सति संभव सूर्यव्रत और व्रतोद्यापन आदि करे।

आषाढ़कृष्ण
सोमवती सं० २००२

दौलतरामगौड़

* अथादित्यहृदयप्रारम्भः *

कर्ता–देशकालौ सङ्कीर्त्य 'ममारोग्यावाप्तये श्री सूर्यनारायणप्रीत्यर्थं द्वादशनमस्कारं करिष्ये' इति सङ्कल्प्य ध्यायेत्–ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनासन्निविष्टः। केयूरवान्मकरकुण्डलवान्किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥ १ ॥ एकचक्रो रथो यस्य दिव्यः कनकभूषितः। स मे भवतु

१ मकरकुण्डलवानिति दाक्षिणात्याः पठन्तीति पूजापङ्कजभास्करे।

सुप्रीतः पद्महस्तो दिवाकरः ॥ २ ॥ मित्राय नमः १
रवये नमः २ सूर्याय नमः ३ भानवे नमः ४ खगाय
नमः ५ पूष्णे नमः ६ हिरण्यगर्भाय नमः ७ मरीचये
नमः ८ आदित्याय नमः ९ सवित्रे नमः १० अर्काय
नमः ११ भास्कराय नमः १२ नमः सावित्रे जगदेकच
क्षुषे जगत्प्रसूतिस्थितिनाशहेतवे । त्रयीमयाय त्रिगुणा
त्मधारिणे विरिञ्चिनारायणशङ्करात्मने ॥१॥ नमोऽस्तु
सूर्याय सहस्ररश्मये सहस्रशाखान्वितसम्भवात्मने ।
सहस्रयोगोद्भवभावभागिने सहस्रसंख्यायुगधारिणे नमः
॥ २॥ आदित्यस्य नमस्कारं ये कुर्वन्ति दिने दिने ।

जन्मान्तरसहस्रेषु दारिद्र्यं नोपजायते ॥३॥ इति ॥

शतानीक उवाच—कथमादित्यमुद्यन्तमुपतिष्ठेद्द्विजोत्तम एतन्मे ब्रूहि विप्रेन्द्र प्रपद्ये शरणं तव ॥१॥
सुमन्त उवाच—इदमेव पुरा पृष्टः शङ्खचक्रगदाधरः। प्रणम्य शिरसा देवमर्जुनेन महात्मना ॥२॥ कुरुक्षेत्रे महाराज निवृत्ते भारते रणे कृष्णं नाथं समासाद्य प्रार्थयित्वाऽब्रवीदिदम् ॥३॥ अर्जुन उवाच—ज्ञानं च धर्मसाराणां गुह्याद्गुह्यतरं तथा। मया कृष्ण परिज्ञातं वाङ्मयं सचराचरम् ॥४॥ सूर्यस्तुतिमयं न्यासं वक्तुमर्हसि माधव। भक्त्या पृच्छामि देवेश कथयस्व प्रसादतः

॥५॥ सूर्य भक्तिं करिष्यामि कथं सूर्यं प्रपूजयेत् । तदहं श्रोतुमिच्छामि त्वत्प्रसादेन यादव ॥६॥ श्रीभगवानुवाच- रुद्रादिदैवतैः सर्वैः पृष्टेन कथितं मया । वक्ष्येऽहं सूर्य विन्यासं शृणु पाण्डव यत्नतः ॥७॥ अस्माकं यत्त्वया पृष्टमेकचित्तो भवार्जुन । तदहं संप्रवक्ष्यामि ह्यादिमध्यावसानकम् ॥८॥ अर्जुन उवाच-नारायण सुरश्रेष्ठ पृच्छामि त्वां महायशः । कथमादित्यमुद्यन्तमुपतिष्ठेत्सनातनम् ॥९॥ श्रीभगवानुवाच-साधु पार्थ महाबाहो बुद्धिमानसि पाण्डव । यन्मां पृच्छस्युपस्थानं तत्पवित्रं विभावसोः ॥ १० ॥ सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाश

नम् । सर्वरोगप्रशमनमायुर्वर्धनमुत्तमम् ॥११॥ अमित्र
दमनं पार्थ संग्रामे जयवर्द्धनम् । वर्द्धनं धनपुत्राणामा
दित्यहृदयं शृणु ॥१२॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते
नात्र संशयः । त्रिषु लोकेषु विख्यात निःश्रेयसकरं
परम् ॥ १३ ॥ देवदेवं नमस्कृत्य प्रातरुत्थाय चार्जुन ।
विघ्नान्यनेकरूपाणि नश्यन्ति स्मरणादपि ॥ १४ ॥
तस्मात्सर्वप्रयत्नेन सूर्यमावाहयेत्सदा । आदित्यहृदयं
नित्यं जाप्यं तच्छृणु पाण्डव ॥१५॥ यज्जपान्मुच्यते
जन्तुर्दारिद्र्यादाशु दुस्तरात् । लभते च महासिद्धिं कुष्ठ
व्याधिविनाशिनीम् ॥१६॥ अस्मिन्मन्त्रे ऋषिश्छन्दो

देवताशक्तिरेव च। सर्वमेव महाबाहो कथयामि तवाग्रतः ॥ १७ ॥ मया तु गोपितं न्यासं सर्वशास्त्रप्रबोधितम् । अथ ते कथयिष्यामि ह्युत्तमं मन्त्रमेव च ॥ १८ ॥

अस्य श्री आदित्यहृदयस्तोत्रमन्त्रस्य श्रीकृष्णऋषिः श्रीसूर्यात्मा त्रिभुवनेश्वरो देवता अनुष्टुप्छन्दः हरितहयरथंदिवाकरं घृणिरितिबीजम् ॐ नमो भगवते जातवेदसे–इति शक्तिः ॐ नमो भगवते आदित्याय नम इति कीलकम् ॐ अग्निगर्भदेवता इत्यस्त्रम् ॐ नमो भगवते तुभ्यमादित्याय नमो नमः श्रीसूर्यनारायणप्रीत्यर्थे जपे विनियोगः। अथ न्यासः–ॐ ह्रां अङ्गुष्ठाभ्यां नमः

ॐ ह्रीं तर्जनीभ्यां नमः २ ॐ ह्रुं मध्यमाभ्यां नमः ३ ॐ ह्रैं अनामिकाभ्यां नमः ४ ॐ ह्रौं कनिष्ठिकाभ्यां नमः ५ ॐ ह्रः करतलकरपृष्ठाभ्यां नमः ६ ॐ ह्रां हृदयाय नमः १ ॐ ह्रीं शिरसे स्वाहा २ ॐ ह्रूं शिखायै वषट् ३ ॐ ह्रैं कवचाय हुम् ४ ॐ ह्रौं नेत्रत्रयाय वौषट् ॥५॥ ॐ ह्रः अस्त्राय-फट् ६ ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः–इति दिग्बन्धः ७ अथ ध्यानम्-भास्वद्रत्नाढ्यमौलिः स्फुरदधररुचारञ्जितश्चारुकेशो भास्वान्यो दिव्यतेजाः करकमलयुतः स्वर्णवर्णः प्रभाभिः। विश्वाकाशावकाशग्रहपतिशिखरे भाति यश्चोदयाद्रौ सर्वानन्दप्रदाता हरिहरन

मितः पातु मां विश्वचक्षुः ॥१॥ पूर्वमष्टदलं पद्मं प्रणवादि
प्रतिष्ठितम् । मायाबीजं दलाष्टाग्रे यन्त्रमुद्धारयेदिति
॥२॥ आदित्यं भास्करं भानुं रविं सूर्यं दिवाकरम् । मार्तण्डं
तपनं चेति दलेष्वष्टसु योजयेत् ॥३॥ दीप्ता सूक्ष्मा जया
भद्रा विभूतिर्विमला तथा । अमोघा विद्युता चेति मध्ये
श्रीः सर्वतोमुखी ॥४॥ सर्वज्ञं सर्वगं चैव सर्वकारणदेवताम् ।
सर्वेशं सर्वहृदयं नमामि सर्वसाक्षिणम् ॥ ५ ॥ सर्वात्मा
सर्वकर्ता च सृष्टिजीवनपालकः । हितः स्वर्गापवर्गश्च
भास्करेश नमोऽस्तु ते ॥६॥ इति प्रार्थना ॥ नमो नम
स्तेऽस्तु सदा विभावसो सर्वात्मने सप्तहयाय भानवे ।

अनन्तशक्तिर्मणिभूषणेन ददस्व भुक्तिं मम मुक्तिमव्य
याम् ॥७॥ अर्कं तु मूर्ध्नि विन्यस्य ललाटे तु रविं न्य
सेत् । विन्यसेन्नेत्रयोः सूर्यं कर्णयोश्च दिवाकरम् ॥८॥
नासिकायां न्यसेद्भानुं मुखे वै भास्करं न्यसेत् । पर्जन्य
मोष्ठयोश्चैव तीक्ष्णं जिह्वान्तरे न्यसेत् ॥९॥ सुवर्णरेतसं
कण्ठे स्कन्धयोस्तिग्मतेजसम् । बाह्वोस्तु पूषणं चैव
मित्रं वै पृष्ठतो न्यसेत् ॥१०॥ वरुणं दक्षिणे हस्ते त्वष्टारं
वामतः करे । हस्तावुष्णकरः पातु हृदयं पातु भानु
मान् ॥११॥ उदरे तु यमं विद्यादादित्यं नाभिमण्डले ।
कट्यां तु विन्यसेद्धंसं रुद्रमूर्वोस्तु विन्यसेत ॥१२॥

जान्वोस्तु गोपतिं न्यस्य सवितारं तु जङ्घयोः । पाद
योश्च विवस्वन्तं गुल्फयोश्च दिवाकरम् ॥१३॥ बाह्य
तस्तु तमोध्वंसं भगमभ्यन्तरे न्यसेत् सर्वाङ्गेषु सहस्रांशु
दिग्विदिक्षु भगं न्यसेत् ॥ १४ ॥ इति दिग्बन्धः ।
एष आदित्यविन्यासो देवानामपि दुर्लभः । इमं भ
क्त्या न्यसेत्पार्थ स याति परमाङ्गतिम् ॥१५॥ काम
क्रोधकृतात्पापान्मुच्यते नात्र संशयः। सर्पादपि भयं
नैव सङ्ग्रामेषु पथिष्वपि॥१६॥ रिपुसङ्घट्टकालेषु तथा
चौरसमागमे। त्रिसन्ध्यं जपतो न्यासं महापातकनाश
नम् ॥१७॥ विस्फोटकालमुत्पन्नं तीव्रज्वरसमुद्भवम् ।

शिरोरोगं नेत्ररोगं सर्वव्याधिविनाशनम् ॥ १८ ॥ कुष्ठ
व्याधिस्तथा दद्रुरोगाश्च विविधाश्च ये । जप्यमान विन
श्यन्ति शृणु भक्त्या तदर्ज्जुन॥१६॥ आदित्यो मन्त्रसंयुक्त
आदित्या भुवनेश्वरः आदित्यान्नापरो देवो ह्यादित्यः
परमेश्वरः ॥२०॥ आदित्यमर्चयद् ब्रह्मा शिव आदित्य
मर्चयत् । यदादित्यमयं तेजो मम तेजस्तदर्ज्जुन ॥२१॥
आदित्यं मन्त्रसंयुक्तमादित्यं भुवनेश्वरम् । आदित्यं य
प्रपश्यन्ति मां पश्यन्ति न संशयः ॥ २२ ॥ त्रिसन्ध्य
मर्चयेत्सूर्यं स्मरेद्भक्त्या तु यो नरः । न स पश्यति दा
रिद्र्यं जन्मजन्मानि चार्ज्जुन ॥२३॥ एतत्ते कथितं पार्थ

ह्यादित्यत्हृदयं मया । शृण्वन्मुक्त्वा च पापेभ्यः सूर्य
लोके महीयते ॥२४॥ ॐनमो भगवते तुभ्यमादित्याय
नमो नमः । आदित्यः सविता सूर्यः खगः पूषा गभि
स्तिमान् ॥२५॥ सुवर्णः स्फटिको भानुः स्फुरितो विश्व
तापनः । रविर्विश्वो महातेजाः सुवर्ण सुप्रबोधकः ॥२६॥
हिरण्यगर्भस्त्रिशिरास्तपनो भास्करो रविः । मार्तण्डो
गोपतिः श्रीमान्कृतज्ञश्च प्रतापवान् ॥ २७ ॥ तमिस्रहा
भगो हंसो नासत्यश्च तमोनुदः । शुद्धा विरोचनः केशी
सहस्रांशुर्महाप्रभः ॥ २८ ॥ विवस्वान्पूषणो मृत्युर्मिहिरो
जामदग्न्यजित् । घर्मरश्मिः पतङ्गश्च शरण्योऽमित्रहा

ऽऽतपाः ॥२९॥ दुर्विज्ञेयगतिः शूरस्तेजोराशिमहायशाः।
शम्भुश्चित्राङ्गदः सौम्यो हव्यकव्यप्रदायकः ॥ ३० ॥
अंशुमानुत्तमो देव ऋग्यजुः साम एव च। हरिदश्वस्त
मोदरः सप्तसप्तिर्मरीचिमान् ॥ ३१ ॥ अग्निगर्भोऽदितेः
पुत्रः शम्भुस्तिमिरनाशनः। पूषा विश्वम्भरो मित्रः
सुवर्णः सुप्रतापवान् ॥ ३२ ॥ आतपी मण्डली भास्वां
स्तपनः सर्वतापनः। कृतविश्वो महातेजाः सर्वरत्नमयो
द्भवः ॥३३॥ अक्षरश्च क्षरश्चैव प्रभाकरविभाकरौ। चन्द्र
श्चन्द्राङ्गदः सौम्यो हव्यकव्यप्रदायकः ॥३४॥ अङ्गा
रकोऽङ्गदोऽगस्ती रक्ताङ्गश्चाङ्गवर्द्धनः। बुद्धो बुद्धासनो

बुद्धिर्बुद्धात्मा बुद्धिवर्द्धनः ॥ २५ ॥ बृहद्भानुर्बृहद्भासो बृहद्धामा बृहस्पतिः । शुक्रस्त्वं शुक्लरेतास्त्वं शुक्लाङ्गः शुक्रभूषणः ॥ ३६ ॥ शनिमान्शनिरूपस्त्वं शनैर्गच्छसि सर्वदा । अनादिरादिरादित्यस्तेजोराशिर्महातपाः ॥ ३७ ॥ अनादिरादिरूपस्त्वमादित्यो दिक्पतिर्यमः । भानुमान्भानुरूपस्त्वं स्वर्भानुर्भानुर्दीप्तिमान् ॥ ३८ ॥ धूमकेतुर्महाकेतुः सर्वकेतुरनुत्तमः । तिमिरावणः शम्भुः स्रष्टा मार्तण्ड एव च ॥ ३९ ॥ नमः पूर्वाय गिरये पश्चिमाय नमो नमः नमोत्तराय गिरये दक्षिणाय नमो नमः ॥ ४० ॥ नमो नमः सहस्रांशो ह्यादित्याय नमो नमः । नमः पद्म

प्रबोधाय नमस्ते द्वादशात्मने ॥४१॥ नमो विश्वप्रबोधाय नमो भ्राजिष्णुजिष्णवे । ज्योतिषे च नमस्तुभ्यं ज्ञानार्काय नमो नमः ॥ ४२ ॥ प्रदीप्ताय प्रगल्भाय युगान्ताय नमो नमः । नमस्ते होतृपतये पृथिवीपतये नमः ॥४३॥ नमोङ्कारवषट्कार सर्वयज्ञ नमोऽस्तु ते । ऋग्वेदादियजुर्वेद सामवेद नमोऽस्तु ते ॥ ४४ ॥ नमो हाटकवर्णाय भास्कराय नमो नमः । जयाय जयभद्राय हरिदश्वाय ते नमः ॥४५॥ दिव्याय दिव्यरूपाय ग्रहाणां पतये नमः । नमस्ते शुचये नित्यं नमः कुरु कुलात्मने ॥४६॥ नमस्त्रैलोक्यनाथाय भूतानां पतये नमः । नमः

केवल्यनाथाय नमस्ते दिव्यचक्षुषे ॥४७॥ त्वं ज्योतिस्त्वं द्युतिर्ब्रह्मा त्वं विष्णुस्त्वं प्रजापतिः। त्वमेव रुद्रो रुद्रात्मा वायुरग्निस्त्वमेव च ॥ ४८ ॥ योजनानां सहस्रे द्वे द्वे शते द्वे च योजने। एकेन निमिषार्द्धेन क्रममाण नमोऽस्तु ते ॥४९॥ नवयोजनलक्षाणि सहस्राद्विशतानि च। यावद्घटीप्रमाणेन क्रममाण नमोऽस्तु ते ॥५०॥ अग्रतश्च नमस्तुभ्यं पृष्ठतश्च सदा नमः। पार्श्वतश्च नमस्तुभ्यं नमस्ते चास्तु सर्वदा ॥५१॥ नमः सुरारिहन्त्रे च सोमसूर्याग्निचक्षुषे। नमो दिव्याय व्योमाय सर्वतन्त्रमयाय च ॥५२॥ नमो वेदान्तवेद्याय सर्वकर्मादिचाक्षिणे।

नमो हरितवर्णाय सुवर्णाय नमो नमः ॥ ५३ ॥ अरुणो माघमासे तु सूर्यो वै फाल्गुने तथा । चैत्रमासे तु वेदाङ्गो भानुर्वैशाखतापनः ॥५४॥ ज्येष्ठमासे तपेदिन्द्र आषाढे तपते रविः । गभस्तिः श्रावणे मासे यमो भाद्रपदे तथा ॥५५॥ इषे सुवर्णरेताश्च कार्तिके च दिवाकरः । मार्गशीर्षे तपेन्मित्रः पौषे विष्णुः सनातनः ॥५६॥ पुरुषस्त्वधिके मासे मासाधिक्ये तु कल्पयेत् । इत्येते द्वादशादित्या काश्यपेयाः प्रकीर्तिताः ॥५७॥ उग्ररूपा महात्मानस्त पन्ते विष्णुरूपिणः । धर्मार्थकाममोक्षाणां प्रस्फुटा हेतवो नृप ॥५८॥ सर्वपापहरं चैवमादित्यं संप्रपूजयेत् ।

एकधा दशधा चैव शतधा च सहस्रधा ॥५९॥ तपन्ते विश्वरूपेण सृजन्ति संहरन्ति च । एष विष्णुः शिव श्चैव ब्रह्मा चैवं प्रजापतिः ॥६०॥ महेन्द्रश्चैव कालश्च यमो वरुण एव च । नक्षत्रग्रहताराणामधिपो विश्वता पनः ॥६१॥ वायुरग्निर्धनाध्यक्षो भूतकर्ता स्वयंप्रभुः । एष देवो हि देवानां सर्वमाप्यायते जगत् ॥६२॥ एष कर्ता हि भूतानां संहर्ता रक्षकस्तथा । एष लोकानुलो कश्च सप्तद्वीपाश्च सागराः ॥६३॥ एष पातालसप्तस्थो दैत्यदानवराक्षसाः । एष धाता विधाता च बीजं क्षेत्रं प्रजापतिः ॥ ६४ ॥ एष एव प्रजा नित्यं सम्वर्धयाति

रश्मिभिः। एष यज्ञः स्वधा स्वाहा ह्रीः श्रीश्च पुरुषोत्तमः
॥६५॥ एष भूतात्मको देवः सूक्ष्मोऽव्यक्तः सनातनः।
ईश्वरः सर्वभूतानां परमेष्ठी प्रजापतिः ॥६६॥ कालात्मा
सर्वभूतात्मा वेदात्मा विश्वतोमुखः। जन्ममृत्युजराव्या
धिसंसारं भयनाशनः॥६७॥ दारिद्र्यव्यसनध्वंसी श्रीमा
न्देवोदिवाकरः। विकर्तनो विवस्वांश्च मार्तण्डो भास्करो
रविः ॥६८॥ लोकप्रकाशकः श्रीमाँल्लोकचक्षुर्ग्रहेश्वरः।
लोकसाक्षी त्रिलोकेशः कर्ता हर्ता तमिस्रहा ॥६९॥
तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः। गभस्तिहस्तो
ब्रह्मण्यः सर्वदेवनमस्कृतः ॥ ७० ॥ आयुरारोग्यमैश्वर्यं

नरानार्यश्च मन्दिरे । यस्य प्रसादात्सन्तुष्टिमादित्य हृदयं जपेत् ।७१॥ इत्येतैर्नामभिः पार्थ ह्यादित्यं स्तौति नित्यशः । प्रातरुत्थाय कौन्तेय तस्य रोगभयं न हि ॥७२॥ पातकान्मुच्यते पार्थ व्याधिभ्यश्च न संशयः । एकसन्ध्यं द्विसन्ध्यं वा सर्वपापैः प्रमुच्यते ॥७३॥ त्रिसन्ध्यं जपमानस्तु पश्येच्च परमं पदम् । यदह्ना कुरुते पापं तदह्ना प्रतिमुच्यते ॥७४॥ यद्रात्र्या कुरुते पापं तद्रात्र्या प्रतिमुच्यते । दद्रुस्फोटककुष्ठानि मण्डलानि विषूचिका ॥७५॥ सर्वव्याधिमहारोगभूतबाधास्तथैव च । डाकिनी शाकिनी चैव महारोगभयं कुतः ॥७६॥ ये

चान्ये दुष्टरोगाश्च ज्वरातीसारकादयः। जपमानस्य नश्यन्ति जीवेच्च शरदां शतम् ॥७७॥ संवत्सरेण मरणं यदा तस्य ध्रुवं भवेत्। अशीर्षा पश्यतिच्छायामहोरात्रं धनञ्जय ॥७८॥ यस्त्विदं पठते भक्त्या भानोर्वारे महात्मनः। प्रातःस्नाने कृते पार्थ चैकाग्रकृतमानसः ॥७९॥ सुवर्णचक्षुर्भवति नचान्धस्तु प्रजायते। पुत्रवान्धनसम्पन्नो जायते चारुजः सुखी ॥८०॥ सर्वसिद्धिमवाप्नोति सर्वत्र विजयी भवेत्। आदित्यहृदयं पुण्यं सूर्यनामविभूषितम् ॥८१॥ श्रुत्वा च निखिलं पार्थ सर्वपापैः प्रमुच्यते। अतः परतरं नास्ति सिद्धिकामस्य पाण्डव ॥८२॥ एत

जपस्व कौन्तेय येन श्रेयो ह्यवाप्स्यसि । आदित्यहृदय नित्यं यः पठेत्सुसमाहितः ॥ ८३ ॥ भ्रूणहा मुच्यते पापात्कृतघ्नो ब्रह्मघातकः । गोघ्नः सुरापो दुर्भोजी दुष्प्रतिग्रहकारकः ॥ ८४ ॥ पातकानि च सर्वाणि दहन्त्येव न संशयः । य इदं शृणुयान्नित्यं जपेद्वापि समाहितः ॥ ८५ ॥ सर्वपापविशुद्धात्मा सूर्यलोके महीयते ॥ अपुत्रो लभते पुत्रान्निर्धनो धनमाप्नुयात् ॥८६॥ कुरोगी मुच्यते रोगाद्भक्त्या य पठते सदा । यस्त्वादित्यदिने प्रातर्नाभिमात्रजले स्थितः ॥ ८७ ॥ उदयाचलमारूढं भास्करं प्रणतः स्थितः । जपते मानवो भक्त्या शृणु

याद्धापि भक्तितः ॥ ८८ ॥ स याति परमं स्थानं यत्र देवो दिवाकरः । अमित्रदमनं पार्थ यदा कर्तुं समारभेत् ॥८९॥ तदा प्रतिकृतिं कृत्वा शत्रोश्चरणपांसुभिः । आक्रम्य वामपादेन ह्यादित्यहृदयं जपेत् ॥ ९० ॥ एतन्मन्त्रं समाहूय सर्वसिद्धिकरं परम् ॥ॐ ह्रीं हिमालीढं स्वाहा १ ॐ ह्रीं निलीढं स्वहा २ ॐ ह्रीं मालीढं स्वाहा ३ । त्रिभिश्च रोगी भवति ज्वरी भवति पञ्चभिः । जपैस्तु सप्तभिः पार्थ राक्षसीं तनुमाविशेत् ॥९१॥ राक्षसेनाभिभूतस्य विकाराञ्छृणु पाण्डव । गीयते नृत्यते नग्नश्चास्फोटयति धावति ॥९२॥

शिवारुतं च कुरुते हसते क्रन्दते पुनः । एवं संपीड्यते
पार्थ यद्यपि स्यान्महेश्वरः ॥९३॥ किं पुनर्मानुषः कश्चि
च्छौचाचारविवर्जितः। पीडितस्य न सन्देहो ज्वरो भवति
दारुणः ॥ ९४ ॥ यदा चानुग्रहं तस्य कर्तुमिच्छेच्छुभङ्क
रम् । तदा सलिलमादाय जपेन्मन्त्रमिमं बुधः ॥९५॥
नमो भगवते तुभ्यमादित्याय नमो नमः । जयाय जय
भद्राय हरिदश्वाय ते नमः ॥९६॥ स्नापयेत्तेन मन्त्रेण
शुभं भवति नान्यथा । अन्यथा च भवेद्दोषो नश्यते
नात्र संशयः ॥ ९७ ॥ अतस्ते निखिलः प्रोक्तः पूजां
चैव निबोध मे । उपलिप्ते शुचौ देशे नियतो वाग्यतः

शुचिः ॥९८॥ वृत्तं वा चतुरस्रं वा लिप्तभूमौ लिखेच्छुचिः। त्रिधा तत्र लिखेत्पद्ममष्टपत्रं सकर्णिकम् ॥ ९९ ॥ अष्टपत्रं लिखेत्पद्मं लिप्ते गोमयमण्डले। पूर्वपत्रे लिखेत्सूर्यमाग्नेय्यां तु रविं न्यसेत् ॥ १०० ॥ याम्यायां च विवस्वन्तं नैर्ऋत्यां तु भगं न्यसेत्। प्रतीच्यां पूषणं विद्याद्वायव्यां मित्रमेव च ॥१०१॥ आदित्यमुत्तरे पत्रे चैशान्यां विष्णुमेव च। मध्ये तु भास्करं विद्यात्क्रमेणैवं समर्चयेत् ॥ १०२ ॥ अतः परतरं नास्ति सिद्धिकामस्य पाण्डव। महातपं समुद्यन्तं प्रणमेत्स कृताञ्जलिः ॥१०३॥ सकेसराणि पद्मानि करवीराणि चार्जुन।

तिलतण्डुलसंयुक्तकुशगन्धोदकेन च ॥ १०४ ॥ रक्तचन्दनमिश्राणि कृत्वा वै ताम्रभाजने । धृत्वा शिरसि तत्पात्रं जानुभ्यां धरणीं स्पृशेत ॥ १०५ ॥ मन्त्रपूतं गुडाकेश चार्घ्यं दद्याद्गभस्तये । सायुधं सरथं चैव सूर्यमावाहयाम्यहम् ॥ १०६ ॥ स्वागतो भव । सुप्रतिष्ठो भव । सन्निधा भव । सन्निहिता भव । सम्मुखो भव । इति पञ्चमुद्राः । स्फुटयित्वाऽर्हयेत्सूर्यं भुक्तिं मुक्तिं लभेन्नरः ॥१०७॥ ॐ श्री विद्यां किलिकिलिकटकटेष्टसर्वार्थसाधनाय स्वाहा । ॐ श्रीं ह्रीं हः हं सः सूर्याय नमः स्वाहा॥ ॐ श्रीं ह्रां ह्रीं ह्रं ह्रैं ह्रौं ह्रः सूर्यमूर्तये स्वाहा । ॐ श्रीं

ह्रीं खं ख: लोकाय सर्वमूर्तये स्वाहा । ॐ हूं मार्तण्डाय स्वाहा । नमोऽस्तु सूर्याय सहस्रभानवे नमोऽस्तु वैश्वानरजातवेदसे । त्वमेव चार्घ्यं प्रतिगृह्ण देव देवाधिदेवाय नमो नमस्ते ॥ १०८ ॥ नमो भगवते तुभ्यं नमस्ते जातवेदसे । दत्तमर्घ्यं मया भानोस्त्वं गृहाण नमोऽस्तु ते ॥१०९॥ एहि सूर्यसहस्रांशो तेजोराशि जगत्पते । अनुकम्पय मां देव गृहाणार्घ्यं नमोऽस्तु ते ॥११०॥ नमो भगवते तुभ्यं नमस्ते जातवेदसे । ममेदमर्घ्यं गृह्ण त्वं देवदेव नमोऽस्तु ते । ॥१११॥ सर्वदेवाधिदेवाय ह्याधिव्याधिविनाशिने । इदं गृहाण मे देव

सर्वव्याधिर्विनश्यतु ॥११२॥ नमःसूर्याय शान्ताय सर्व रोगविनाशिने । ममेप्सितं फलं दत्त्वा प्रसीद परमेश्वर ॥११३॥ ॐ नमो भगवते सूर्याय स्वाहा । ॐ शिवाय स्वाहा । ॐ नमः सर्वात्मने सूर्याय स्वाहा । ॐ नमः अक्षय्यतेजसे स्वाहा । सर्वसङ्कष्टदारिद्र्यं शत्रुन्नाशय नाशय । सर्वलोकेषु विश्वात्मन्सर्वात्मन्सर्वदर्शक ॥११४॥ नमो भगवते सूर्य कुष्ठरोगान्विखण्डय । आयुरारोग्य मैश्वर्यं देहि देव नमोऽस्तु ते ॥११५॥ नमो भगवते तुभ्य मादित्याय नमो नमः ॐ अक्षय्यतेजसे नमः । ॐ सूर्याय नमः ॥ ॐ विश्वमूर्तये नमः । आदित्यं च शिवं

विद्याच्छिवमादित्यरूपिणम् । उभयोरन्तरं नास्ति ह्यादित्यस्य शिवस्य च ॥११६॥ एतादिच्छाम्यहं श्रोतुं पुरुषो वै दिवाकरः । उदये ब्रह्मणो रूपं मध्याह्ने तु महेश्वरः ॥११७॥ अस्तमाने स्वयं विष्णुस्त्रिमूर्तिश्च दिवाकरः । नमो भगवते तुभ्यं विष्णवे प्रभाविष्णवे ॥११८॥ ममेदमर्घ्यं प्रतिगृह्ण देव देवाधिदेवाय नमो नमस्ते । श्रीसूर्याय साङ्गाय सपरिवाराय श्रीसूर्यनारायणायेदमर्घ्यम् ॥११९॥ हिमघ्नाय तमोघ्नाय रक्षोघ्नाय च ते नमः । कृतघ्नघ्नाय सत्याय तस्मै सूर्यात्मने नमः ॥१२०॥ जयोजयश्च विजयो जितप्राणो

जितश्रमः। मनोजवो जितक्रोधो वाजिनः सप्तकीर्तिताः
॥१२१॥ हरितहयरथं दिवाकरं कनकमयाम्बुजरेणुपिञ्ज
रम्॥ प्रतिदिनमुदये नवं नवं शरणमुपैमि हिरण्यरेतसम्
॥१२२॥ न त व्यालाः प्रबाधन्ते न व्याधिभ्यो भयं
भवेत्। न नागेभ्यो भयं चैव न च भूतभयं क्वचित्॥१२३॥
अग्निशत्रुभयं नास्ति पार्थिवेभ्यस्तथैव च। दुर्गतिं तरते
घोरां प्रजां च लभते पशून्॥१२४॥ सिद्धिकामो लभेत्सिद्धिं
कन्याकामस्तु कन्यकाम्। एतत्पठेत्स कौन्तेय भक्ति
युक्तेन चेतसा ॥१२५॥ अश्वमेधसहस्रस्य वाजपेयश
तस्य च। कन्याकोटिसहस्रस्य दत्तस्य फलमाप्नुयात्

॥१२६॥ इदमादित्यहृदयं योऽधीते सततं नरः । सर्वपा
पाविशुद्धात्मा सूर्यलोके महीयते ॥१२७॥ नास्त्यादित्य
समो देवो नास्त्यादित्यसमा गतिः ॥ प्रत्यक्षो भगवा
न्विष्णुर्येन विश्वं प्रतिष्ठितम् ॥१२८॥ नवतिर्योजनं
लक्षसहस्राणि शतानि च । यावद्घटीप्रमाणेन तावच्च
रति भास्करः ॥१२९॥ गवां शतसहस्रस्य सम्यग्द
त्तस्य यत्फलम् । तत्फलं लभते विद्वाञ्छान्तात्मा स्तौति
यो रविम् ॥१३०॥ योऽधीते सूर्यहृदयं सकलं सफलं
भवेत् । अष्टानां ब्रह्मणानां च लेखयित्वा समर्पयेत्
॥१३१॥ ब्रह्मलोके ऋषीणां च जायते मानुषोऽपि वा ।

जातिस्मरत्वमाप्नोति शुद्धात्मा नात्र संशयः ॥१३२॥
अजाय लोकत्रयपावनाय भूतात्मने गोपतये वृषाय ।
सूर्याय सर्वप्रलयान्तकाय नमो महाकारुणिकोत्तमाय
॥ १३३ ॥ विवस्वते ज्ञानभृदन्तरात्मने जगत्प्रदीपाय
जगद्धितैषिणे । स्वयंभुवे दीप्तसहस्रचक्षुषे सुरोत्तमाया
मिततेजसे नमः ॥१३४॥ सुरैरनेकैः परिसेविताय हिर
ण्यगर्भाय हिरण्मयाय । महात्मने मोक्षप्रदाय नित्यं
नमोऽस्तु ते वासरकारणाय ॥१३५॥ आदित्यश्चार्चितो
देव आदित्यः परमं पदम् । आदित्यो मातृको भूत्वा
आदित्यो वाङ्मयं जगत् ॥ १३६॥ आदित्यं प्रेतक्षे

भक्त्या मां पश्यति ध्रुवं नरः। नादित्यं पश्यते भक्त्या न स पश्यति मां नरः ॥१३७॥ त्रिगुणं च त्रितत्त्वं च त्रयो देवास्त्रयोऽग्नयः। त्रयाणां च त्रिमूर्तिस्त्वं तुरीय स्त्वं नमोऽस्तु ते ॥१३८॥ नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे। त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चिनारायणशङ्करात्मने ॥१३९॥ यस्योदये नेह जगत्प्रबुध्यते प्रवर्तते चाखिलकर्मसिद्धये। ब्रह्मेन्द्रनारायणरुद्रवन्दितः स नः सदा यच्छतु मङ्गलं रविः ॥१४०॥ नमोऽस्तु सूर्याय सहस्ररश्मये सहस्रशाखान्वितसम्भवात्मने। सहस्रयोगोद्भवभावभागिने सहस्रसंख्या

युगधारिणे नमः ॥१४१॥ यन्मण्डलं दीप्तिकरं विशालं रत्नप्रभं तीव्रमनादिरूपम् । दारिद्र्यदुःखक्षयकारणं च पुनातु मां तत्सवितुर्वरेण्यम् ॥१४२॥ यन्मण्डलं देवगणैः सुपूजितं विप्रैः स्तुतं भावनमुक्तिकोविदम् । तं देवदेवं प्रणमामि सूर्यं पुनातु मां तत्सवितुर्वरेण्यम् ॥ १४३ ॥ यन्मण्डलं ज्ञानघनं त्वगम्यं त्रैलोक्यपूज्यं त्रिगुणात्मरूपम् । समस्ततेजोमयदिव्यरूपं पुनातु मां तत्सवितुर्वरेण्यम् ॥१४४॥ यन्मण्डलं गूढमतिप्रबोधं धर्मस्य वृद्धिं कुरुते जनानाम् । यत्सर्वपापक्षयकारणं च पुनातु मां तत्सवितुर्वरेण्यम् ॥१४५॥ यन्मण्डलं व्याधिविनाशदक्षं

यदृग्यजुःसामसु संप्रगीतम् । प्रकाशितं येन च भूर्भुवः स्वः पुनातु मां तत्सवितुर्वरेण्यम् ॥ १४६ ॥ यन्मण्डलं वेदविदो विदन्ति गायन्ति यच्चारणसिद्धसङ्घाः । यद्यो गिनो योगजुषां च सङ्घाः पुनातु मां तत्सवितुर्वरेण्यम् ॥२४७॥ यन्मण्डलं सर्वजनेषु पूजितं ज्योतिश्च कुर्या दिह मर्त्यलोके । यत्कालकाला दिमनादिरूपं पुनातु मां तत्सवितुर्वरेण्यम् ॥१४८॥ यन्मण्डलं विष्णुचतुर्मुखाख्यं यदक्षरं पापहरं जनानाम् । यत्कालकल्पक्षयकारणं च पुनातु मां तत्सवितुर्वरेण्यम् ॥१४९॥ यन्मण्डलं विश्व सृजां प्रसिद्धमुत्पत्तिरक्षाप्रलयप्रगल्भम् । यस्मिञ्जगत्सं

हरतेऽखिलं च पुनातु मां तत्सवितुर्वरेण्यम् ॥ १५० ॥
यन्मण्डलं सर्वगतस्य विष्णोरात्मा परं धाम विशुद्ध
सत्त्वम् । सूक्ष्मान्तरैर्योगपथानुगम्यं पुनातु मां तत्सवि
तुर्वरेण्यम् ॥१५१॥ यन्मण्डलं ब्रह्मविदो वदन्ति गाय
न्ति यच्चारणासिद्धसङ्घाः । यन्मण्डलं वेदविदः स्म
रन्ति पुनातु मां तत्सवितुर्वरेण्यम् ॥१५२॥ यन्मण्डलं
वेदविदोपगीतं यद्योगिनां योगपथानुगम्यम् । तत्सर्ववेदं
प्रणमामि सूर्यं पुनातु मां तत्सवितुर्वरेण्यम् ॥ १५३ ॥
मण्डलाष्टमिदं पुण्यं यः पठेत्सततं नरः । सर्वपापविशु
द्धात्मा सूर्यलोके महीयते ॥१५४॥ ध्येयः सदासवितृम

ण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः। केयूरवान्मकरकुण्डलवान्किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः ॥१५५॥ सशङ्खचक्रं रविमण्डले स्थित कुशेशयाक्रान्तमनन्तमच्युतम् । भजामि बुद्धचा तपनीयमूर्तिं सुरोत्तमं चित्रविभूषणोज्ज्वलम् ॥१५६॥ एवं ब्रह्मादयो देवा ऋषयश्च तपोधनाः । कीर्तयन्ति सुरश्रेष्ठं देवं नारायणं विभुम् ॥१५७॥ वेदवेदाङ्गशारीरं दिव्यदीप्तिकरं परम् । रक्षोघ्नं रक्तवर्णं च सृष्टिसंहारकारकम् ॥१५८॥ एकचक्रो रथो यस्य दिव्यः कनकभूषितः। स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः॥१५९॥ आदित्यः

प्रथमं नाम द्वितीयं तु दिवाकरः । तृतीय भास्करः प्रोक्तं चतुर्थं तु प्रभाकरः ॥ १६० ॥ पञ्चमं तु सहस्रांशुः षष्ठं चैव त्रिलोचनः । सप्तमं हरिदश्वश्च अष्टमं च विभावसुः १६१॥ नवमं दिनकृत्प्रोक्तं दशमं द्वादशात्मकः । एकादशं त्रयोमूर्तिर्द्वादशं सूर्य एव च ॥१६२॥ द्वादशादित्यनामानि प्रातःकाले पठेन्नरः । दुःस्वप्ननाशनं चैव सर्वदुःखं च नश्यति ॥१६३॥ दद्रुकुष्ठहरं चैव दारिद्र्यं हरते ध्रुवम् । सर्वतीर्थप्रदं चैव सर्वकामप्रवर्धनम् ॥१६४॥ यः पठेत्प्रातरुत्थाय भक्त्या नित्यमिदं नरः । सौख्यमायुस्तथारोग्यं लभते मोक्षमेव च ॥१६५॥ अग्निमीडे नम

स्तुभ्यमिषेत्वोर्जेस्वरूपिणे । अग्न आयाहि वीतिस्त्वं नमस्ते ज्योतिषां पते ॥१६६॥ शन्नोदेवी नमस्तुभ्यं जगच्चक्षुर्नमोऽस्तु ते । पञ्चमायोपवेदाय नमस्तुभ्यं नमो नमः ॥१६७॥ पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः । सप्ताश्वरथसंयुक्तो द्विभुजः स्यात्सदा रविः ॥ १६८ ॥ आदित्यस्य नमस्कारं ये कुर्वन्ति दिने दिने । जन्मान्तरसहस्रेषु दारिद्र्यं नोपजायते ॥१६९॥ उदयगिरिमुपेतं भास्करं पद्महस्तं निखिलभुवननेत्रं रक्तरत्नोपमेयम् । तिमिरकरिमृगेन्द्रं बोधकं पद्मिनीनां सुरवरमभिवन्दे सुन्दरं विश्ववन्द्यम् ॥ १७० ॥

इति श्रीभविष्योत्तरपुराणे श्रीकृष्णार्जुनसंवादे आदित्यहृदयस्तोत्रं संपूर्णम् ।

संकट में ईश्वर की आराधना करो-

देवानां प्रतिपत्तिश्च सत्यं साधुमता सताम् ।
किन्तु दुःखार्णवं प्राप्य तस्मादर्चत गुरून् ॥ महाभारत ।

ददाति यत्पार्थिव यत्करोति यद्वा तपस्तप्यति यज्जुहोति ।
न तस्य नाशोऽस्ति न चापकर्षो नान्यस्तदश्नाति स एव कर्ता ॥

मुद्रक—बाबू ठाकुर प्रसाद गुप्त, बम्बई प्रेस, राजादरवाज़ा, बनारस सिटि ।

तव दिव्यं रथं यान्तमनुयान्ति वरार्थिनः ।
सिद्धचारणगन्धर्वा यक्षगुह्यकपन्नगाः ॥
त्रयस्त्रिंशच्च वै देवास्तथा वैमानिका गणाः ।
सोपेन्द्राः समहेन्द्राश्च त्वामिष्ट्वा सिद्धिमागताः ।
(महाभारत)
हर प्रकार के कर्मकाण्ड की पुस्तकें मिलने का एक मात्रस्थान—
बाबू ठाकुरप्रसाद गुप्त बुकसेलर,
राजादरवाजा, ब्रान्च कचौड़ीगली, बनारस सिटी ।